श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

ब्रह्मसंहितायां त्रैलोक्यमोहनं नाम

# ॥ श्रीनृसिंहकवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनृसिंहकवचम् ॥

नारद उवाच

इन्द्रादिदेववृन्देश ईड्येश्वर जगत्पते।
महाविष्णोर्नृसिंहस्य कवचं ब्रूहि मे प्रभो।
यस्य प्रपठनाद् विद्वांस्त्रैलोक्यविजयी भवेत्॥

ब्रह्मोवाच

श्रुणु नारद वक्ष्यामि पुत्रश्रेष्ठ तपोधन।
कवचं नरसिंहस्य त्रैलोक्यविजयी भवेत्॥ 1 ॥

स्रष्टाऽहं जगतां वत्स पठनाद् धारणाद् यतः।
लक्ष्मीर्जगत्त्रयं पाति संहर्ता च महेश्वरः॥ 2 ॥

पठनाद् धारणाद् देवाः बहवश्च दिगीश्वराः।
ब्रह्ममन्त्रमयं वक्ष्ये भ्रान्तादिविनिवारकम्॥ 3 ॥

यस्य प्रसादाद् दुर्वासास्त्रैलोक्यविजयी भवेत्।
पठनाद् धारणाद् योऽस्य शास्ता च क्रोधभैरवः॥ 4 ॥

त्रैलोक्यविजयस्यापि कवचस्य प्रजापतिः।
ऋषिः छन्दस्तु गायत्री नृसिंहो देवता विभुः॥ 5 ॥

क्ष्रौं बीजं मे शिरः पातु चन्द्रवर्णो महामनुः।
ओं उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्॥ 6 ॥

नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।
द्वात्रिंशदक्षरो मन्त्रो मन्त्रराजः सुरद्रुमः॥ 7॥

कण्ठं पातु ध्रुवं क्ष्रौं हृद्भगवते चक्षुषी मम।
नरसिंहाय च ज्वालामालिने पातु कर्णकम्॥ 8॥

दीप्तदंष्ट्राय च तथा अग्निनेत्राय नासिकाम्।
सर्वरक्षोघ्नाय च तथा सर्वभूतहिताय च॥ 9॥

सर्वज्वरविनाशाय दह दह पदद्वयम्।
रक्ष रक्ष वर्ममन्त्रः स्वाहा पातु मुखं मम॥ 10॥

तारादिरामचन्द्राय नमः पातु हृदं मम।
क्लीं पायात् पार्श्वयुग्मञ्च तारो नमः पदं ततः॥ 11॥

नारायणाय नाभिञ्च आं ह्रीं क्रौं क्ष्रौं च हुं फट्।
षडक्षरः कटिं पातु ओं नमो भगवते पदम्॥ 12॥

वासुदेवाय च पृष्ठं क्लीं कृष्णाय क्लीं ऊरुद्वयम्।
क्लीं कृष्णाय सदा पातु जानुनी च मनूत्तमः॥ 13॥

क्लीं ग्लौं क्लीं श्यामलाङ्गाय नमः पायात् पदद्वयम्।
क्ष्रौं नृसिंहाय क्ष्रौं च सर्वाङ्गं मे सदाऽवतु॥ 14॥

इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम्।
तव स्नेहान्मयाऽऽख्यातं गृह्णीयात् कवचं ततः॥ 15॥

गुरुपूजां विधायाथ गृह्णीयात् कवचं ततः।
सर्वपुण्ययुतो भूत्वा सर्वसिद्धियुतो भवेत्॥ 16॥

शतमष्टोत्तरञ्चास्य पुरश्चर्याविधिः स्मृतः।
हवनादीन् दशांशेन कृत्वा तत्साधकोत्तमः॥ 17॥

ततस्तु सिद्धकवचो रूपेण मदनोपमः।
स्पर्धामुद्धूय भवने लक्ष्मीर्वाणी वसेत्मुखे॥ 18॥

पुष्पाञ्जल्यष्टकं दत्त्वा मूलेनैव पठेत् सकृत्।
अपि वर्षसहस्राणां पूजानां फलमाप्नुयात्॥ 19॥

भूर्जे विलिख्य गुटिकां स्वर्णस्यां धारयेद् यदि।
कण्ठे वा दक्षिणे बाहौ नरसिंहो भवेत् स्वयम्॥ 20॥

योषिद् वामभुजे चैव पुरुषो दक्षिणे करे।
बिभृयात् कवचं पुण्यं सर्वसिद्धियुतो भवेत्॥ 21॥

काकवन्ध्या च या नारी मृतवत्सा च या भवेत्।
जन्मवन्ध्या नष्टपुत्रा बहुपुत्रवती भवेत्॥ 22॥

कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः।
त्रैलोक्यं क्षोभयत्येवं त्रैलोक्यविजयी भवेत्॥ 23॥

भूतप्रेतपिशाचाश्च राक्षसा दानवाश्च ये।
तं दृष्ट्वा प्रपलायन्ते देशाद्देशान्तरं ध्रुवम्॥ 24॥

यस्मिन् गृहे च कवचं ग्रामे वा यदि तिष्ठति।
तद्देशं तु परित्यज्य प्रयान्ति ह्यतिदूरतः॥ 25॥

॥ इति श्रीनृसिंहकवचम् समाप्तम्॥